M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. /
Ser. 1418

Title Pratisthakrama

1418

In Complete

Pratistha Kram		: Title
:	:	: Author
:	:	: Editor
816 :	:	: Year, Vols.
:	:	: Publisher
1418 :	:	: Remarks

श्रीगणेशायनमः॥अथवापीरूपतडागानांदिजलाशयानांप्रतिष्ठाक्रमोलिख्यते॥तत्सुलेपेह्निपुण्याहवाचनपू
र्वकं।वाप्यादिपश्चात्प्रागुदक्प्रवणेदेशेवेदीगर्भेचतुर्मुखंमंडपंकुर्यात्॥मंडपस्तुरामः।वाजिपेयः।कर्त्त्रि
भः।ध्वजपताकादिधारणं।ततःस्तंभमुखेषुसरत्नाःसपल्लवावस्त्रवेष्टिताःसफलाःकलशाःएकैकस्यां
दिशिस्थापनीयाः॥वैवैकलशौप्रतिद्वारं।ततोवेद्याःसपादहस्तांनरंसक्का।यथासंभवंकुंडकरणं॥वे
द्यास्तुनैर्ऋतेवास्तुपीठकरणं।ईशानेग्रहपीठकरणं।ततस्तुवेद्यांवारुणंमंडलंपंचवर्णैर्धान्यैरर्चयेत्
।पद्मार्द्धनवभिःप्रोक्तानानिस्तुतिस्मृतिःस्मृता।अष्टाभिर-कान्कुर्यान्निमिस्तुचतुरंगुलाः॥ततोयजमा
नेसमंतसर्वौषधिमिश्रोदकेनस्नानंकर्त्तव्यं।आचमनं॥शुक्लवस्त्रपरिधानं॥शुक्लगंधमालादिधारणं॥
ततःकर्मस्वीकारः।ततोमातृस्थापनं।नांदीमुखश्राद्धं।ऋत्विक्वरणं।तत्रायंप्रयोगः+प्रकारः।यवान्गृ
हीत्वा।दक्षिणंजानुवालभ्य।गोत्रादिसंकीर्त्य।आचार्यादिवरणं।एवंब्रह्मा।अष्टौऋत्विजः।अष्टौद्वारपाला
।अष्टौजापकाः॥एकस्त्वाचार्यः।एकोब्रह्मा।रुद्रजापकएकः।समाविंशतिब्राह्मणाभवंति।ततस्तान्
मधुपर्केणार्चयेत्।तेभ्यःकंकणकुंडलमुद्रिकादीहेमानिविविधानिवासांसिसर्वेभ्यःसमानिदेयानि
आचार्यायद्विगुणं॥मधुपर्कार्चनंसंपाद्ययजमानःसपत्नीकःसऋत्विग्भिर्वेदभेरीभिर्मंगलशब्दपुरः
कस्मिंश्चिद्बहुपदेशेजलाश्रयेगच्छेत्।जलाशयंप्राप्यआग्नेयभागेजलमातरःस्थाप्याः।मकरी।ग्राहणी।उग्रा
कच्छपी।गोधा।नासिका।मात्स्यी।सर्पिणी।सप्तैताजलमातरः।ऊर्मि।लक्ष्मी।जलापामा।वारुणीजलवा
सिनी।जलदा।+क्रमेणसप्तैताजलप्रतिष्ठाकरणं।आवाहनं।स्नाननैवेद्यसंकल्पः।तस्माज्जलाशयाज्जल

सूत्रेकिलत्रामादाय मंडपं प्रनिगच्छेयुः। मंडपं प्रदक्षिणीकृत्य पश्चिमद्वारे स्थित्वा। उत्थाप्यां पाणिभ्यामर्घपा
त्रमादाय शांतिपाठं पठेत्। एवंविधां पृथ्वीं मनसा ध्यायेत्। चतुर्भुजां शुक्लवर्णां कूर्मपृष्ठोपरिस्थितां।
पद्महस्तां खड्गशूलधरीं सुप्रसन्नां चतुर्मुखीं। सर्वसस्यां वसुंधरां ध्यायेत्। आगच्छ सर्वकल्याणी वसु
धे विश्वपालिनी। पृथिवी ब्रह्मदत्तासि काश्यपेनाभिवंदिता। इति प्रार्थना। उद्धृतासि वराहेण विष्णु
ना शतबाहुना। दंष्ट्राग्रेण लीलया देवी यज्ञार्घं गृहाण्याम्यहं। इति अर्घं दद्यात्। ततो यजमानः सपत्नी
कः सऋत्विक् पश्चिमद्वारेण प्रविशेत्। होमार्थं यद्यप्यंतस्पूर्वद्वारेण प्रविशेत्। दानार्थं दक्षिणेन
प्रतिष्ठार्थमुत्तरेण। ततो वरुणमंडलोपरि कलशस्थापनं। सौवर्णौ कूर्ममकरौ राजतौ मत्स्यडुंडु
भी ताम्रौ कुलीरमंडूकौ आयसः शिशुमारकः। सौवर्णपात्रे वरुणस्य तु तः आसीदायात्। पंच
मृत्तिकाप्रक्षेपः तस्योपरि माषाक्षतं ताम्रपात्रं स्थापयित्वा। गोरोचंदनगंधागरुमिश्रार्यगुग्गु
लप्रक्षेपः। तदुपरि हेममयं वरुणं स्थापयेत्। वरुणस्य च अनुसारेण। वरुणं स्थापयेन्मध्ये वारु
णं मंत्रमाश्रित्य। ब्रह्माणं चाग्निं वं विष्णुं तत्रैव स्थापयेद्बुधः। विनायकं च विन्यस्य कमलामंबिकां
तथा। शांत्यर्थं सर्वलोकानां नूतनामं न्यसेन्नतः। प्रतिष्ठा। पंचामृतैः स्नानं। उपचारैः पूजनं। पुष्पैः
प्रद्योतस्तैः फलनैवेद्यदीपकैः। एवं वेदमंत्रैः पूजयेत्। वरुणस्याह्वानं। वरुणं आविताम्नूवन्। इम
म्मे वरुणे अचतन्स्मृनिः। इति वरुणपूजा। ततः सर्वदिक्पालपूजनं। अग्निमीळे इति सर्वद्वारं प्रपूजयेत्॥ ॥ १


ॐ श्री
वरुणायन
मः॥
ब्रह्मणे नमः॥
रुद्राय नमः।
केतुभ्यो नमः॥ ३६